# हेमसंकीर्तनम्



श्रुत्वा हेमाभरणभगवत्कालधर्मस्य वार्तां
स्तब्धस्वान्तो मुनिरनुरतो दूरदेशे निषण्णः ।
किंकर्तव्यावगमविधुरोऽस्त्रैरविश्रान्तवर्षै-
र्जातः कार्यादरविरहितो लुप्तबोधः किमन्धः ॥१॥

मुद्रां शुद्धात्मसुखसुषमामस्य पद्माननस्य
स्मृत्वा वाचां विशदरचनां पुण्यकारुण्यपूर्णाम् ।
प्रेमाऽऽसाराऽपहृतकलुषे कान्तनेत्रारविन्दे
शोकोद्रेकः क इव हृदये जागृतोऽवर्णनीयः ॥२॥

यस्मात् सौख्यं सपदि लभते जीव एष क्रमेण
तस्माद् दुःखान्यहह लभते कालपर्यायभेदात् ।
नित्यं येषां सुखकरमभूद् दर्शनं भाविकानां
तेषामेव स्मरणमधुना वेदनामातनोति ॥३॥

अर्हच्चैत्योपरिगतमहाकेतुसंसर्गभाजः
किञ्चिद् वातायनपवनतः सान्त्वना तस्य जाता ।
पीडायोगो भवति गुरुणा साधकानां यदाऽपि
तीर्थाधीशो भवति शरणं नूनमेषां तदानीम् ॥४॥

शब्दानामंत्रयति स मुनिस्सूरिदेवार्चनार्थं
सर्वानुच्चारयति च तदेकत्वसम्पादनाय ।
स्वर्यातानामलमतिशयादक्षरत्वानुभूत्या
जाता सूतिः सुरसवचसो हेमसंकीर्तनस्य ॥५॥

दिल्ल्यां राष्ट्राधिपतिभवनं पाटलोद्याननिर्यद्-
गन्धोन्मत्तं विकटघटितस्थाणुसंघातभव्यम् ।
सर्वोत्कृष्टैर्विभवनिवहैस्स्वर्गतुल्यं यदासीत्
सूरीन्द्राणां दिवि विगमनाद् जातमेतत् किमूनम् ॥६॥

राज्याधीशैरतुलधनिकैर्विश्वविद्यालयैश्च
लोहस्तम्भादिकबहुविधाश्चर्यकारिस्थलैश्च ।
भाषावेषाचरणललितैर्लक्षलोकैर्विलासैः-
स्वर्गोदारं नगरमधुना मानवीयं बभूव ॥७॥

विद्युद्दीपस्फुरितमहसि स्नानमस्या नगर्या
नक्तं यानागमनगमनैश्चञ्चलालोकवत्याः ।
दृष्ट्वा रोमांञ्चिततनु नभः कोटिभिस्तारकाणां
सूरेर्मन्ये दिवि विचरणेऽदर्शयन्मार्गरेखाम् ॥८॥

Scanned by CamScanner

क्वायं वाप्यां रमणरमणैः प्रीतसर्वो हरीनः
क्वेदं मुम्बापुरि निवसनं रुग्णदेहस्य सूरेः ।
कर्णावत्याः सपदि विहृतिः क्वेयमाचार्यभानोः
दिल्ल्यां निष्ठा क्व च भगवतो बाढमाघातदात्री ॥९॥
शास्त्राज्ञानामविरततया चिन्तनैश्चेतनाया
मर्मोद्घाटः क इव समभूत् सर्वलोकोपकारी ।
मौनं तेषां वचनमभवत् संशयच्छेदशस्त्रं
वाचोऽप्यल्पा विरचितमहाप्रज्ञसंदोहजल्पाः ॥१०॥
सौहार्दानां सुरभिवसतिः सार्वसंबोधसंभृत्
सौहित्यानामनुपमसरः शीतलाह्लाददायि ।
सौख्याधायी सुविहितमतस्थायिनां भावुकानां
सौजन्यानां खनिरपकृतिव्रातपातेऽप्युदात्तः ॥११॥
स्वाध्यायानामविरतरसास्वादसंतृप्तिभाजो
ऽहंकाराणामवहृतगुणैर्हुंकृतैर्नास्य बाधा ।
पीयूषानाममलकलनाशालिनां देवतानां
नैवोद्गारा विषमगरलैराविलाः संभवन्ति ॥१२॥
बाल्ये पित्रोर्मनसि निवसन्नेत्रयोर्दृष्टिवत् स
श्रामण्येऽयं गुरुजनमनोऽम्भोजभृंगो बभूव ।
गच्छेशत्वे निजपरगणैरादरोत्कर्षमाप
पूजां कुर्वन् भवति महतां पूजनीयो महद्भिः ॥१३॥
उद्यत्कर्मागमविरचनोदस्तसारस्वतानां
सार्वाकाशप्रसृतयशसाऽऽक्रान्तदिक्सागराणाम् ।
आशीर्वादान् स लघुवयसि प्रेमसूरीश्वराणां
चारित्राम्भोनिचयविलसद्वीचिवेगानवाप ॥१४॥
देवाकारैर्विमलवचनोच्चारनिस्तारकारै-
र्धर्माधारैर्जिनमतरिपुध्वंसपुण्याधिकारैः ।
सत्त्वागारैः कमलवदनै रामचन्द्राधिनाथै-
र्विन्यस्तोऽयं सुबहुसमयं गच्छकार्यप्रबंधे ॥१५॥
येषां तेजः सुरपतिकुले मत्सरोत्पादकारि
येषां शक्तिर्विपुलभुवनाभोगसंवाहिकाऽसीत् ।
येषां दृष्टिर्भविककमलस्तोमचन्द्रप्रभाऽयं
धन्यस्तेषां तपगणभृतामास साहाय्यकारी ॥१६॥
शास्त्रोदन्वन्मथननिरतैः पंडितैः पूज्यमानो
गीतार्थानां विविधनिवहैर्नित्यमासेव्यमानः ।
रामाचार्यो धनिकविसरैर्भावितैर्वन्द्यमान
एनं प्रेम्णा वहति हृदये काऽस्य सौभाग्यसीमा ॥१७॥
भाव्यं हेमाभरण ! भवताऽथो मया साकमेव
संपाद्येयं मम वचनतः संघ-गच्छानुशास्तिः ।
इत्यादेशाद् रचयति गुरोरेष संचालनानि
गुर्वाज्ञानामनुसरणतः श्रेयसामेव लाभः ॥१८॥
निर्ग्रंथानां परिषदि वरः खेचराणां यथेन्द्रः
पावित्र्याणां हिमगिरिपतिर्निष्कलंकोऽसमानः ।
अर्हच्छास्त्राध्ययननिरतो मानसे किं मराल-
श्चक्रे दीक्षाग्रहणविषये प्रेरणां तं मृगांकः ॥१९॥
मेघध्वानः किमु गगनविस्तारविस्तारतारो
भागीरथ्या हरसुखकरः किं निनादः प्रसन्नः ।
शंखोद्घोषः किमुत विशदोऽन्तर्मनोमोदचारुः
श्रुत्वाऽऽशंका भवति नियतं श्रीमृगांकस्य गीतिम् ॥२०॥
सेवाभावः श्रुतरसिकता सत्यधर्माश्रयश्च
कार्योत्साहो विनयनमना भक्तिरर्हद्गुरुणाम् ।
पंचाचाराचरणकरणः सत्त्वसाध्योऽप्रमादो
लब्धाश्चान्येऽपि गुरुचरणात् सद्गुणा दीक्षितेन ॥२१॥
श्रामण्यस्य व्रतमनुपमं यत्कृपाया अवाप्तं
साम्यास्वादस्त्रिदशमहितो यस्य पुण्यप्रसादः ।
तेषां श्रीमद्गुरुभगवतामन्त्यकाले समाधे-
र्दानं कृत्वाऽयमभवदहो वर्णनातीतभाग्यः ॥२२॥
श्रीरामाणामतिशयकृपाभाजनेऽत्यन्तसौम्ये
वात्सल्यानां परमकरुणानामनन्ते समुद्रे ।
नाम्ना स्पष्टं महत उदये शान्तकान्ते सुदान्ते
भक्तिर्बद्धा तपसि निरतेऽत्यन्तविश्वासनद्धा ॥२३॥
वैशारद्यं त्रिदिवपगुरोर्मानभंगं तनोति
गानस्वानोऽमृतमधुरसास्वादमाविष्करोति।
तर्कोदर्कोऽभिभवति मनो यस्य वाचस्पतीनां
सूरीन्द्रास्ते महत उदया हेमसाधौ प्रसन्नाः ॥२४॥
श्रीरामेन्दोः परिचरणया वायुपुत्रायमाणः
शिक्षादातुर्विनयविहितैरिन्द्रपुत्रायमाणः ।
औदार्येण प्रकटयशसा सूर्यपुत्रायमाणो
हेमाचार्ये प्रणयमवहत् सैष सूरिस्त्रिमूर्तिः ॥२५॥

Scanned by CamScanner

श्रद्धासक्तिं त्रिशतमुनयोऽस्मिन् वहन्ति प्रबुद्धाः
साध्व्यस्तावन्नवशतमिता भक्तिभावैस्स्तुवन्ति ।
श्राद्धाश्चैवं चरणशरणाः सन्ति पारेसहस्त्रैः
सोऽयं गच्छांगणसुरतरुर्हेमसूरिर्नमस्यः ॥२६॥
चक्षुर्युग्मं विशदकरुणादीपमानं विशालं
प्रौढोल्लासिस्मितविलसितैः पावनं चाननाब्जम् ।
तारानाथादधिकविभयोद्भासितो भालदेशः
शोभा फुल्लाम्बुजनिसुरसा काऽपि दन्तच्छदीया ॥२७॥
मन्द्रोच्चारैर्मुरजघटनासंगतः कण्ठभागो
वक्षोभूमिर्दृढिमभवनं क्लेशकोट्याऽविभेद्या ।
कुक्षिर्गूढोऽम्बुधिरिव किलादृश्यमानान्तरंगः
सिंहस्येवावगणितरिपुर्नाविनामः कटश्च ॥२८॥
पादौ तेषां महितमहितौ यद्भुवा श्रीनिधानौ
स्पृष्टौ तस्यां शुभकरमहामंगलैस्स्थानमाप्तम् ।
मेघच्छायां वहति वसुधा यत्र तत्रोद्भवन्ति
वल्लीवृक्षादिकपरिसरे नव्यतारुण्यलीलाः ॥२९॥
येषां शीर्षे क्षिपति भगवान् वासचूर्णं करेण
तेषां गेहं ध्रुवमगणितैर्धर्मलाभैर्विभाति ।
प्रत्याख्यानैर्मुनिपतिसमुच्चारितेऽकल्पनीयः
सत्त्वोत्कर्षो भविषु नियतं कोऽपि जागर्ति धन्यः ॥३०॥
अक्रोधोऽसौ सकलसमुदायस्य संयोजकोऽभूत्
मानाभावाद् गुरुलघुजनानां महत् प्रेमपात्रम्।
मायाहीनोऽखिलगुणिकुलाकर्षणः साहजिक्या
लोभोन्मुक्तो रमयति मनो निर्ममत्वानुभूत्याम् ॥३१॥
रेखाचित्रैरिव सुरचिताकारहस्ताक्षरैस्स
पत्राण्याज्ञानुनयकथनप्रश्ननिर्वर्णकानि ।
योग्यान्नित्यं लिखति भगवच्छासनानुश्रयाणि
तैरापन्ना सुविदिततमा प्रेरणा जागृतिश्च ॥३२॥
व्याख्यानानि त्वरितयशसामेव निष्पादकानि
हित्वा गच्छादिकमुपचरन् निःस्पृहत्वं स दध्रे ।
आस्ते दूरं जनपरिचयात् संघसेवां करोति
कार्यं कुर्वन्नविरतमयं नात्मशंसां तनोति ॥३३॥
नानुष्ठाने न बहुजनतामेलने नोपधाने
चैत्यालेखे न च न मुखपत्रीयनामप्रचारे ।
मोहस्तेषां शमसुखवतां सच्चिदानंदधारा-
निर्मग्नानां समजनि महापुण्यसंपूजितानाम् ॥३४॥
श्रीमद्भक्तान् करतलगतानादधाना महत्त्वं
किञ्चिल्लब्ध्वाऽऽत्मविमुखदशां कर्मयोगाद् व्रजन्ति ।
लोकाद् दूरे मुनिरनुवसेत् पूजितस्स्याच्च लोकै-
स्सूर्येणेवोद्दलिततमसा-हेमनीतिः किलेयम् ॥३५॥
सर्वस्मिन्नाकलयति विभुस्सद्गुणाँश्चोपकारान्
नो कस्यापि स्मरति भगवान् पाप-दोषा-पराधान् ।
हंसश्चञ्चुं पयसि धवले स्निग्धमिष्टे निधत्ते
नीरं तस्मात् स्वयमिव रसैर्हीनमित्येति दूरम् ॥३६॥
नो ग्रंथाग्रेऽभिलषति निजस्याभिधानं विरक्तो
नो कस्याञ्चिद् घटयति कृतौ प्रेरकत्वप्रशंसाम् ।
धाराधीशोऽम्बुकणपतनैः प्लावयेत् पृथ्वीमेको
नाख्याख्यानैरपि तु करणैरेव सन्तः प्रसन्नाः ॥३७॥
ज्ञानोत्कर्षे सति हि न जनाकर्षणस्योपयोगो
व्याख्यानादेः परिषदि महावृन्दमेलापरक्तः ।
केदाराणां मृदुमृदि जलैर्बालवृक्षोद्गमेषु
वाद्योत्पाद्यैः कलकलरवैर्नैव कश्चिद् विशेषः ॥३८॥
सत्ताभीप्सा मनसि न धृताऽनेन दर्पप्रधाना
सत्तासूत्रग्रहणजमदः कुत्रचिन्नोपचारे ।
सत्ता साध्याऽस्ति न गुणवतां केवलं साधिका सा
निःस्वार्थानां परिणमति - तद् हेमवृत्तावगम्यम् ॥३९॥
सत्यं वाच्यं पवितचरितं भाषया भागवत्या
सत्योच्चारे वचनविषयं वारणीयं कटुत्वम् ।
नासत्यानामनुमतिपरं वाक्यमाभाषणीयं
कार्योऽसत्ये भयविरहितैः शब्दवज्रप्रहारः ॥४०॥
रागद्वेषक्षयविरचने सत्यमार्गोपयोगो
नैवैतेषामुदयकरणे योजयेत् सत्यधर्मम् ।
मूलोत्सेकैस्तरुविकसने वारिधारा प्रयोज्या
वृक्षोद्घातप्रथयितरि सा मूलनाशे तु नैव ॥४१॥
आज्ञायोगे विहितरतयस्संघलोका भवन्तु
निंदां शंसां रचयतु जनो नास्मि लोकोपजीव्यः ।
चिन्तां धृत्वाऽऽगमपरिणतां चेतसीत्थं मुनीन्द्रः
हेमाचार्यस्त्रिकरणशुभः शास्ति गच्छाधिपत्यम् ॥४२॥

Scanned by CamScanner

स्वर्गं याते निजगुरुवरे श्रीमृगांकाख्यसूरौ
रामेन्दूनां चरणकमलासेवनायामयात् सः ।
तस्मिन् यातेऽयमुदयगुरोस्संनिधानेषु तस्थौ
स्वर्यातेऽस्मिन्नपि गणपतिस्थानमासादयत् सः ॥४३॥
जातः पूर्णातटगवलसाडे पुरे गूर्जरात्रे
वाप्यां बाल्यं छगनपितुरानन्ददं निर्जगाम ।
संस्काराणां जलदपटली श्रीमणिश्चाऽस्य माता
जाता साध्वी सुतमुनिकरैः मोंक्षमालाऽऽख्ययाऽहो ॥४४॥
मित्रैः क्रीडन्न कितवलवं सैष जग्राह बाल्ये
केलिं तुच्छामपि न कुरुते स्वीयसन्मानसेव्यः ।
अभ्यासेषु प्रबलधिषणा सौहृदं चोत्तमेषु
मन्येऽबालाऽऽचरितललितं निर्मितं भाविनैव ॥४५॥
पूजासामायिककरणिभिर्दीपकेनानुजेन
साकं संघे जिनमतरतान् पौषधैर्हर्षदोऽभूत् ।
धन्यः संघो भवति महतां बाल्यकालावलोकैः
श्रीवज्रर्षेरिव शिशुवयस्स्थस्य तुम्बीवनस्य ॥४६॥
घंटानादैः कुसुमरचितैरस्य शोभाविधानै-
र्धूपैर्दीपैरथ जलसपर्याभिरध्यक्षतैश्च ।
मालाजापैर्जिनपभवने बाल्यमर्हत्समक्षं
पावित्र्याणां परमपदवीमाप पुण्योपपादैः ॥४७॥
वाप्यायातैः श्रमणनिवहैर्मोक्षमार्गोपयानै-
स्संयोगोऽस्य व्यरचि विरतत्वानुकूलो जनन्या ।
सौवर्णेषु प्रकटरविवित्रासकारिप्रभेषु
संपातोऽभूत् सुरससुरभीणां विधातुर्निदेशात् ॥४८॥
याति स्वेच्छाभिरथ विहृतौ तैश्च शालाविरामं
कृत्वा कालं बहु तदपि नो तद्गुणांकेषु हानिः ।
गाथापाठे रुचिरविचला श्रीमृगांकेन दृष्टा
यावत्तावद् विरतिविषये पृष्ट एतस्य पित्रा ॥४९॥
नो शिष्याणां मम शुभगुरोर्लालसा काचिदस्ति
पुत्रः कस्मैचिदपि मुनये दीयतामेष धन्यः ।
श्रीपूज्यानामिति निगदितं शृण्वतैवाथ पित्रा
तस्यैवायं भवजलसमुत्तारणार्थं प्रदत्तः ॥५०॥
वर्षीदानैरखिलपुरपीयूषपानैरमानै-
र्भृत्वा भव्यात्मसु वरमुमुक्षां महाभागधेयः ।

निष्क्रान्तोऽयं प्रथमविरतोऽमेयपुण्येन वाप्यां
प्राप्तं रत्नं प्रचुरमहसा दीप्तिमच्छासनेन ॥५१॥
या या सेवा यदपि यदपि क्षत्रियस्येव सत्त्वं
यो यो बोधो न खलु वचनैर्वर्णना तस्य शक्या ।
यन्निश्रायामयमभवदेते महान्तोऽपि धन्या
ये तन्निश्राकृतवसतयस्तेऽपि धन्याश्च सन्तः ॥५२॥
संबद्धोऽयं मुनिपदयुतैर्नैककल्याणमित्रै-
र्मुख्यः कीर्तेर्यश इति वरश्चैव मुक्तिप्रभाख्यः ।
श्रीश्रेयांसप्रभमुनिपतिः संघसंचालनायां
गच्छेशस्याविरतमभवच्छान्तमूर्तिस्सहायः ॥५३॥
रोगो रुद्रः प्रभवति गुरोः पित्तकोषस्य देहे
पीडानन्त्यं प्रथयतितमां साम्यभावस्थितस्य ।
रोगं चैनं सुहृदिव गले धारयन् हेमसूरिः
पूर्वाचार्यैरिव मम तमोनाशमद्यातनोतु ॥५४॥
रक्तोच्चापं वमनमसृजां दाहमेवं विबन्धं
श्वासैर्मान्द्यं पचनविरहं खाद्यमात्रस्य कष्टम् ।
पानीयस्याप्यपचनमहो कर्मसत्ता वितेने
तर्षे नीरं चुलुकति मुखे नो गलत्यामयत्वात् ॥५५॥
एको रोगोऽपि विघटयितुं सक्षमः चित्तशान्तिं
दृष्टो नैकैर्गदविषधरैर्नासमाधिं जगाम ।
यादृक् पुष्टो भवति भवतामामयानां विकार-
स्तादृक् तेषां प्रशमसरितः संप्लवानां विलासः ॥५६॥
त्यक्त्वा रोगाविलतनुमुपादाय चात्मानमच्छं
ज्येष्ठे मासे शरदि गतिलेश्यानभोनेत्रमित्याम् ।
पक्षे कृष्णे परमसमतासागरे मज्जनानां
क्रीडां कुर्वन् दिवि स विगतः सप्तमीवासरेण ॥५७॥
तद्वृत्तान्तैः श्रमणसमुदाये च संघे च शोक-
च्छाया व्याप्ता तमसि निचिते भव्यलोकाः निमग्नाः ।
शिष्यान् भक्तानसुखकरणः कालदेवानुदिष्टो
दिल्ल्यां तस्यान्तिमविधिरभूत् कोटिशो वित्तदानैः ॥५८॥
स्वाध्यायानामसमरसिकोऽत्रैक एवाऽस्ति हेमा
सेवाकार्योपचितकरणोऽत्रैक एवाऽस्ति हेमा ।
उद्यत्सञ्चालनसुनिपुणोऽत्रैक एवाऽस्ति हेमा
गच्छेशानोऽखिलबहुमतोऽत्रैक एवाऽस्ति हेमा ॥५९॥

Scanned by CamScanner

नो सेवानामवसरमहं प्राप्तवानेकदाऽपि
हेमाचार्यांघ्रियुगलविमुक्तात्मभारोऽप्यभाग्यः ।
तद्वात्सल्यामृतरससमास्वादभाजां मुनीनां
वृन्दे स्थानं भवतु मम सद्भाग्यलभ्यं सदैव ॥६०॥

धन्याः शिष्या विनयकुशलाः सन्निधिस्पर्शनेन
प्रापुः पुण्यं गणपतिकृपानिर्मितं सानुबन्धम् ।
वन्दे चन्द्रादिकयतिवरान् भूषणान्तान् गणीन्द्रो
हेमाचार्यस्सुरतरुसमो यैश्चिरं सेवितोऽयम् ॥६१॥

मन्दाक्रान्तापदैर्भक्त्या तदायुःप्रमितैस्स्तुतः
हेमभूषणसूरीन्द्रः कृपासिन्धुः प्रसीदतु ।
रामचन्द्रमहाचार्य-शिष्येणेदं विनिर्मितम्
हेमसंकीर्तनं काव्यं प्रशमाद् रतिनाऽऽदरात् ॥

**– पू. मुनिश्रीप्रशमरतिविजयजी म.**

* * *

Scanned by CamScanner